## U.G. 5th Semester Examination - 2020

# SANSKRIT

## [HONOURS]

### Discipline Specific Elective (DSE)

### Course Code : SANH-DSE-T-02

Full Marks : 60 Time : $2\frac{1}{2}$ Hours

*The figures in the right-hand margin indicate marks. Candidates are required to give their answers in their own words as far as practicable.*

1. Answer any **ten** questions in Sanskrit in Devanāgari Lipi: 2×10=20

निम्नोक्तेषु **दश** प्रश्नान् सुरगिरा देवनागरीलिप्या च समाधेहि :

क) उपनिषदिति शब्दस्य का व्युत्पत्तिः? बृहदारण्यकोपनिषदि कति अध्यायाः सन्ति?

ख) "स होवाच न वा अरे...।"—स इति पदेन को बोध्यः? स कस्यै इदमुक्तवान्?

ग) "निदिध्यासितव्यो मैत्रेयि!"—निदिध्यामितव्य इति पदस्य का व्युत्पत्तिः? मैत्रेयी कीदृशी नारी आसीत्?

घ) योगसूत्रग्रन्थस्य प्रणेता को भवति? अस्य ग्रन्थस्य द्वितीयं सूत्रं किमस्ति?



ङ) योगसूत्रग्रन्थे कति पादाः सन्ति? के च ते?

च) योगसूत्रानुसारेण यमस्य कति भेदाः? के च ते?

छ) योगसूत्रानुसारेण प्राणायामः कः? तस्य कति भेदाः? के च ते?

ज) योगसूत्रानुसारेण संयमः कः?

झ) योगसूत्रानुसारेण चित्तप्रसादनं कथं भवति?

ञ) श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि अस्ति? गीतायाः प्रवक्ता कः?

ट) श्रीमद्भगवद्गीतायां कति अध्यायाः सन्ति? अस्या षष्ठाध्यायस्य नाम किमस्ति?

ठ) "मोघं पार्थ स जीवति।"—अत्र वक्ता किं वक्तुमैच्छत्?

ड) "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।"—अस्य श्लोकांशस्य तात्पर्य विवृणोतु।

ढ) कथं कर्म अकर्मणो ज्यायः?

ण) के सर्वकिल्विषैः मुच्यन्ते? के च पापमेव भुञ्जते?

2. Answer any **four** of the following questions: 5×4=20

अधोधृतेषु प्रश्नेषु यथेच्छं **चत्वारः** समोधेया :

क) बृहदारण्यकोपनिषदि आम्रातस्य मननस्य निदिध्यासनस्य वा स्वरूपं प्रतिपादयत।

ख) वङ्गलान्यतरभाषया अनुद्यताम् :

"न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति, आत्मनस्तु कामाय सर्वं प्रियं भवति। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयि, आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्।"।

ग) योगसूत्रानुसारेण चित्तवृत्तिनिरोधोपायाः संक्षेपेणालोचनीयाः।

घ) "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः।"—योगसूत्रमिदं प्रपञ्चय।

ङ) श्रीमद्भगवद्गीतानुसारेण कर्मयोगस्वरूपं संक्षेपेण प्रदर्शय।

च) मानवाचारपरिशुद्धौ भक्तियोगोपयोगं प्रदर्शयत।

3. Answer any **two** of the following questions. One must be written in Sanskrit language in Devanāgari Lipi: 10×2=20

अधोलिखितेषु प्रश्नेषु यथेच्छं प्रश्न**द्वयमु**त्तरत। तयोरेकमवश्यं संस्कृतेन देवनागरीलिप्या च लेख्यम्। :

क) "आत्मा वा अरे द्रष्टव्यः श्रोतव्यः....।"—इति कः कस्यै कथमुपदिदेश? वक्ता आत्मोपलब्धये यदुपदिष्टवान् तत् पर्यालोचयत। 1+1+2+6

ख) योगसूत्रानुसारेण योगशब्दस्य कः अर्थः? योगाङ्गानि कानि? योगाङ्गेषु यथाभिमतं योगाङ्गत्रयस्वरूपमुद्घाटय। 2+2+6

ग) श्रीमद्भगवद्गीतानुसारेण ज्ञानयोगस्य विषयः संक्षेपेण प्रतिपादयत। 10



घ) व्याख्या कार्या (कस्यचन **द्वयस्य**) : 5×2=10

i) नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः।।

ii) "आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्।"

iii) यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्विषैः।
भुंजते ते त्वघं पापा ये पचन्त्यात्मकारणात्।।

---